रामपरत्वरत्नाकर
बोधनीधि ✓

बोधनिधि विरचित
श्रीरामपरत्व रत्नाकर

८८ ग्रं.सं. ६६१ २३०

नेपाल सिंह विरचित

श्रीरामचरित्र रत्नाकर

४८ गु.सि. ६६१ 230

राम

३॥

लि

श्रीगणेशायनमः॥ रामायप्रभुदेवेशराजिनेऽजवेधेरामायमम्ध्येहृदिस्थायामायपूर्णपंचेरुणायपुरुषा
नायवामाजिने॥ रामायत्मप्रवेतत्वधामसुपरिग्रभायकामायेगोरामायप्रभुमतोहांतानीतिरलागमा
यगमायमे॥१॥ जगत्सृष्टौयस्यवारिमुखाणांम्ब्रयंगामिसर्वा गिरचसतुख्यानं॥ यःशर्मदःसर्वेव
लीमुखानांनमाकांनोमिसदामुखानां॥२॥ जनकजापदपद्ममधुव्रतोगुरुकृपाखिलसिद्धिसम
र्पितः॥ स्वनिबोधनिधिःपरयामुदाकियदिदंनुसतांपरितुष्टये॥३॥ तदच्युतार्थेःसुमहाप्रमोदाः
परत्वरत्नेःपरिपूर्णगर्भम्॥ परत्वरत्नाकरनामधेयंविचार्यकार्यसफलंक्रमंमे॥४॥ श्रीरामारतव

राम

॥१॥

वैसिल्लब्ध्वामानुष्यमर्थदंइहामुत्रहितार्थायपतितव्यंमनोषिभिः॥५॥ स्वव्रश्पकंविषयमवज
नालमंतेकर्मतुसारामिरकास्यनहिप्रसिद्धं॥ तस्मात्वंहिगुहपार्थसमस्तसाध्यंसेव्यंजनेरखिल
तापनिवारणाय॥६॥ तदुक्तंश्रीभागवते॥ प्राप्त्वासुदुर्लभमिदंबहुसंभवांतेमानुष्यमर्थ
दमनित्यमपीहधीरः॥ तूर्णंयतेतनपतेदनुमृत्युयावन्निःश्रेयसायविषयःखलुसर्वतःस्यात्॥१०॥ न
दृष्टलोकेबहुधाविचारितोपलब्धनेकानिनिरूपितानि॥ अमेयमत्यंफलदंममेतिचपाप्स्यंते
विंशतिमंसर्वे॥७॥ श्रीपादहर्षंपतितत्वदेवसत्यंमतंपांहसफलंवांच॥ अनन्याचार्यंबहुधामिमगी

प्र ४

राम ०

ते निर्दिष्टं लौकिकमानसिद्धं ॥ ४ ॥ इत्थं प्रमाणैस्समवेत्य गौरं निश्चीयते श्रीमतं न चान्यन्नू
न चापि काउत्र पदार्थनं च कार्य्यं तानत्र विचारणीया ॥ तदुक्तं च श्रीभागवते ॥ योगास्त्र
यो मया प्रोक्ता नृणां श्रेयोवि[illegible]या ॥ ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कुत्र
चित् ॥ १ ॥ सा चांगैः पालनमेव धर्मं ज्ञानं स्वतत्त्वावगमस्स्व पुंसः ॥ क्तिः परेशे भजनं हि देवं
त्रयस्त्वमत्रोत्तमसूत्तमो च ॥ २ ॥ मन्वादिमुनिभिः प्रोक्तं नित्यं नैमित्तिकं च यत् ॥ तद्धि कर्म ह
रेः कार्यं त्यागोपायोयमेव हि तत् ॥ ३ ॥ काम्यं कर्म निषिद्धं च त्याज्यमेव सदा बुधैः ॥ ह्येयोः

राम ५

॥ नास्ति ज्ञानोपकारत्वमन्तःकरणशोधनं ॥

पूर्वोक्तकर्मणो मध्ये नित्यं सर्वाघनाशनं ॥ ४ ॥ ज्ञानं कारणशुद्ध्यर्थं भक्तिर्ज्ञानोपकारकं । तत्र
चार्पितस्याङ्गं स्वर्गदत्वं मनीषिभिः ॥ ५ ॥ यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं । अभि
लाषोपनीतं च तत्सुखं स्वःपदास्पदं ॥ ६ ॥ इत्यादिवचनात्स्वर्गं स्वतंत्रं परधामकं । भगव
त्प्राप्तकं स्थानं केवलं सुखरूपकं ॥ ७ ॥ श्रुतिश्चाक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृ
तं भवति ॥ ८ ॥ निःकामं केवलं कर्म कृत्वा देवं समर्पयेत् । ज्ञानेन चित्तशुद्धिः स्यादिह
वेति विनिश्चितं ॥ ९ ॥ स्मृतेश्च धर्मेण पापमपनुदति ॥ १० ॥ तत्रैव पनकेनापि वा पञ्चे

स्वा॰ तं

राम

॥ ३ ॥

मापिवा ह विहैमेरा तानुपहनमनाएवमचति ॥ १९ ॥ ज्ञानं विचारतस्तस्य तत्त्वमस्यादि
वाक्यत ॥ व्यासपुत्रादिवेदांता प्रोक्तवाक्यानुसारतः ॥ २० ॥ सद्गुरोपानुरोधेन सर्व्वार्थ
ज्ञेषयुक्तितः ॥ ज्ञानं चतुर्विधं प्रोक्तं परस्परविरोधितं ॥ २१ ॥ ब्रह्मादेनमुनिभिः प्रोक्तं विशि
ष्टाद्वैतमेव च ॥ द्वैताद्वैतमेव तद्द्वैतं चेति चतुर्विधं ॥ २२ ॥ तत्राद्वैतमतं श्रुत्वा वैष्णवं तं त्रलाध
नं हितं ॥ तेनेव साधनेनेति ब्रह्मसायुज्यमाप्नुयात् ॥ २३ ॥ उक्तं च भागवते ॥ ज्ञानं हृद्ब्रह्मप
ध्यामं ब्रह्मात्मपरात्मपदं ॥ एवं समीक्ष्य चात्मानमात्मन्याधाय निःकलं ॥ २४ ॥ दशो तेनतद

राम

॥ ३ ॥

कंपादेत्तेत्तिहानंविधानतः ॥ नइत्थंसिरारपिंचविश्वंचपरयगांश्रयः ॥ २७ ॥ तत्त्वान्निम
क्तिपोगस्यसाधनेवर्णितानिवै ॥ तेषामन्यतमंज्ञानमुपकारंकरोतिहि ॥ २८ ॥ तस्मांद्धतं
गुरुगमंकेवलंभक्तिसाधनं ॥ अन्येषामप्यसिद्धार्थेलक्षणाक्लिष्टकल्पना ॥ २९ ॥ वेदां
तांहृदयंशुद्धैर्नैककर्मादिसाधकैः ॥ ब्रह्मज्ञानादिकंहेतुदर्शनानिचनिश्चितं ॥ ३० ॥ त
त्कुतोस्यपरमभिन्नंद्रष्टुपरोक्षंतुआसस्तापासमानंवृत्तंपरिषस्वजाते तपोस्वःपं
प्यलंस्याद्धत्यनअन्तन्योन्नमिवाकर्षति ॥ ३१ ॥ ब्रह्मणःसाधयत्वंचस्तुतोस्य

स्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिं सर्वतः स्पृत्वा अत्यतिष्ठद्दशांगुल
मिति ॥ १ ॥ अत्र सावयवे भगवद्विग्रहे देहदेहिविभागाभावएवोक्तः ॥ श्रीभागवते
ऽप्युक्तं पिदेववपुषो मदनुग्रहस्य स्वेच्छामयस्य न तु भूतमयस्य कोपि ॥ नेशे महि त्व
वसितुं मनसांतरेण साक्षात्तवैव किमुतात्मसुखानुभूतेः ॥ २ ॥ एवं सावयवस्यैव ज्ञानं
भक्तिसाधनमिति श्रुतेः ॥ वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः ॥ परस्ता
त् ॥ तमेव विदित्वाऽतिमृत्युमेति नान्यः ॥ पंथा विद्यतेऽयनाय ॥ ३ ॥ पा ॥ कृतेस्साना

त्वमुक्तिरितिनत्यैवप्रतिपादनंभवति॥ जगतः प्रवाहनित्यत्वंचभुनो सर्प्पोवंदम
सौधातायथापूर्वमकल्पयद्दिवंचपृथिवींचांतरिक्षमथोस्व॥१॥ नदेवपवानां
लोकानामहत्वमत्वंश्रीमहाभागे॥ स्वदपानखण्डलजिनात्लोकामपाशभः
शुस्याश्चनाकपृष्ठाश्चप्रतिग्राह्मीष्वमामकान॥१॥ नदंनवर्तिनांजीवानांकाल
त्वपेपितमेश्वरभिन्नत्वेसतिनित्यत्वंचगीतास॥ मत्वेवाहंजातुनाशंनत्वंनेमेज
नाधिपा॥ नचैवनभविष्यामः सर्वेवयमतःपरमिति॥ जीवानांपारवश्यमुक्तंश्रीम॥

एम

॥पू॥

दुःखमाप्नोति ॥ नैमनः कामकारो हि पुरुषो मनीश्वरः ॥ इतरस्वेतरास्तेश्वेवं क्रान्तां ॥ प
रिकर्षति ॥३॥ जीवानां नानात्वमुक्तं नन्वेवमेक ॥ पालयते लोकमेकः ॥ पालयते
कुलं ॥ मजन्म को हि निरये एकः स्वर्गे महीयते ॥३॥ ब्रह्मणः कारणं त्वं जगतः
कार्यं त्वं च प्रभुर्नो ॥ पतो वा उमानि भूतानि जायंते येन जातानि जीवंति यत्प्र
यंत्यभिविशंति तद् ब्रह्म विजिज्ञासस्व ॥५॥ तथा च व्याससूत्रं अथातो
ब्रह्मजिज्ञासा ॥६॥ जन्माद्यस्य यतः ॥७॥ जीवानां मंतव्यो मितेन पृथग ब

एम

॥पू॥

स्थानं च वस्तुनो ॥ यज्ञात्म नित्यतृप्तात्मा ननु मंत्ररोप मतीति ॥ ५३ ॥ सगुणस्य परत्वं
वस्तुनो ॥ सकारणं कारणाकारणाधिपेन चास्य कश्चिज्जनिता न चाधिपः ॥ न
तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते ॥ ५४ ॥ तमीश्वराणां
परमं महेश्वरं तं दैवतानां परमं च दैवतं ॥ पतिं पतीनां परमं परस्ताद्विदाम देवं भुवने
शमीड्यं ॥ ५५ ॥ मायापाशस्त्वजो वाधिष्ठातृत्वात्मपृथक्त्वतः योपादानं च वस्तुनो
ऽजामेकां लो॥हितशुक्लकृष्णां बह्वीं प्रजां जनयंतीं स्वरूपां ॥ अजो ह्येको

सुखमाराध्यशेनेजहात्यनेनांमुक्तिमोगामजोन्यः॥२४॥नआमवतमार्गीतातहस्यपम
सहितं॥भूमिरापोनलोवायुःखंमनोबुद्धिरेवचअहंकारइतीयंमेभिन्ना
प्रकृतिरष्टधा॥७॥अपरेयमितस्त्वन्यांप्रकृतिंविद्धिमेपरां॥जीवभूतांमहाबा
होययेदंधार्यतेजगत॥८॥भगवद्वल्लोरागांपात्वंचप्रभुनौ॥सर्वेषामेव
तिजापमानः॥९॥यथात्वःपात्वंचप्रभुनोदेवानांपुण्यपोध्यानस्यांहितामपः
क्रोशःस्वर्गोलोकोज्ञानिधावनः॥पावैनांब्रह्मणोवेदंमृत्नेनाद्वनांपुष्पैन

मेवब्रह्मचब्रह्माचब्रह्मायुःकीर्तिंप्रजाद्स्युरिति॥पु॥तथाचनित्योनित्यानांचेतनश्चेत
नानांबहूनामेकोयोविदधातिकामान्॥नहि स्मःपरमंपदंसदापश्यंतिसूरयइति॥प॥
जीवानांभावरागंज्ञानंईश्वरस्यनित्यावगतंज्ञानंचोक्तंभगवता॥बहूनिमेव्यतीता
निजन्मानितवचार्जुनः तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप॥५॥अजोपिसन्न
व्ययात्माभूतानामीश्वरोपिसन्॥प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया
॥६॥यदायदाहिधर्मस्यग्लानिर्भवतिभारत॥अभ्युत्थानमधर्मस्यतदात्मानंसृजा

राम
॥ ७ ॥

ष्यम॥ ७॥ परित्राणाय साधूनां विनाशाय च दुःकृतां॥ धर्मसंस्थापनार्थाय संभ
वामि युगे युगे॥ ८॥ जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्वतः॥ त्यक्त्वा देहं पुनर्ज
न्म नैति मामेति सोऽर्जुन॥ ९॥ नाम्नः पर्यायं वक्ष्यते॥ नामानि विश्वानि न संति लो
के यदाविरासीदनृतस्य सर्वे॥ नामानि सर्वाणि यमाविशंति तं वै विष्णुं परममुदाह
रंतीति॥ ५ ॥ ब्रह्मणः साकारविग्रहत्वाच्चैतन्यमिति श्रुतिः॥ रमंते योगिनोऽनंते
सत्यानंदे चिदात्मनि॥ इति रामपदेनासौ परब्रह्माभिधीयते॥ ८१॥ तत्र ब्रह्मण्युत ब्रह्म

राम
॥ ७ ॥

ध्यात्मवृत्तरागोमेधयविशेष्यपदं किमिति विशेषणं च किमिति शंकापां सगुणत्वनि
त्यत्वेश्रुतिः॥पूर्वपरं चारतो भापयेत्तैशिशश्रीलं तोपरि जातो ग्रध्वां॥विश्वादन्तो भु
वनानि चच अन्नमयो विदधज्ञापनेपुनाति॥२॥भुन्योपि नवोनवोभवति जायमा
नोऽह्नां केतुरुषसामेत्यग्ने भागं देवेभ्यो विदधात्यायन्प्रचंद्रमास्तिरते दीर्घमायुरि-
ति॥६॥सगुणविशेषणत्वेश्रुतिः परंहृतं ब्रह्मतस्यतनुभा ग्रध्यात्मवृत्तरागा विशेषणत्
त्वेश्रुतिः॥यस्यप्रभाप्रभतोजगदंडकोटिकोटिष्वशेषवसुधादिविभूतिभिन्नं॥तद्ब्रह्मनिः

कोटि

कलमनंतमगाधबोधं गोविंदमादिपुरुषं तमहं भजामि ॥ ६४ ॥ ननु प्रज्ञानमानंदं ब्रह्म
ः अहं ब्रह्मास्मि तत्त्वमसि ॥ अयमात्मा ब्रह्मेत्यादिश्रुतिभिर्जीवस्य ब्रह्मणश्चाभे
दत्वे तात्पर्य्यस्य दृष्टत्वाद्वैतवादिभिः कृतं तन्न ॥ अभेदव्याख्याने केवला विरोधोऽर्थे
विरोधश्च न दृश्येवं बोधं भवति ॥ प्रज्ञानं ज्ञानं आनंदं च ब्रह्मविशेषणं ॥ तेन प्रज्ञानस्वरूपत्वं ज्ञानव
त्वं परमानंदगुणावत्वं च ब्रह्मणः ॥ बहुप्रकाशकत्वं नतु तद्भिन्नस्य जीवस्येति ॥ अत्र प्रका
शोपि तु जीवस्य प्रसंगस्य नास्तीति ॥ अहं ब्रह्मास्मीति ॥ अहमित्युद्दिश्यात्मनो ब्रह्म

वे १

त्वंविधीयते॥ नरत्नत्वं। पदगाच्योवक्तादेशेन॥ नस्यशाद्व्रस्त्वंसिध्यपेव॥ नतु
जीवभावस्यमिति॥ अत्रापिप्रकारान्तरेणोच्यते भगवज्जन्मत्वात ननात॰ तत्वरूपामे
दकपन्नस्याख्यमेव॥ नत्वमसीति भगवतः साकारविग्रहस्यतत्वनप्रसंगोपर
देनव्रसेत्स्युपक्रम्य जगत्कारणतांपरोब्रह्मतंपदंवनेतनत्वमेवासीतिनिर्देश्यं॥ अ
पौरुषेयपरोक्षस्य श्रीमन्नारायणादिविग्रहस्यनपार्थक्यमितितत्वं॥ अत्र
जीवस्योपदेशोकोवावकाशः अपमानाभावस्येति॥ अत्रपरमात्मनिकृष्णवर्त्तमानस्या

त्वाच्छ्रीमन्नारायणादिविलक्षणस्वपरोक्षंब्रह्मेति ॥ उत्तमाधिकारिणोऽज्ञाननिर
सनं ॥ तथाप्रकरणात्वंवनदार्काथमेव वदन्ति इत्यादिस्वस्तनाभागोवत्स्वरूपम
नुवर्ण्यनेतिनेतीति वदतोऽनिर्वचनीयत्वमेव सिद्धांतेनिरूपयंति ॥ वस्तुतस्तु
नैतावत्सिद्धांतदशायांपावनत्व वर्णितमहिम्नः सकाशात्व्यारंगमत्वमेव
निरूपितं एतावानस्य महिमाऽतोज्यायांश्च पुरुषः ॥ पादोऽस्य विश्वाभूतानि
त्रिपादस्यामृतं दिवि ॥ ६३ ॥ इति दिक् ॥ भक्तिः प्रेम्नः पराकाष्ठारहस्यंश्रौतसं

मतं ॥ सहिताग्रमयोगेन भगवत्स्त्रीणां परं ॥ ८४ ॥ तत्राधिकारिणो द्वेधा सापे
क्षा निर्पेक्षिका ॥ सापेक्षा त्वं वर्णाधा ॥ कैवल्यान्नारदाद्य· ॥ ८५ ॥ श्रुतिस्मृती
ममैवाज्ञे तपोऽल्लंघ्य प्रवर्तते ॥ आज्ञाभंगी मम द्वेषी मद्भक्तोऽपि न वैष्णवः ॥ ८६ ॥
इत्यादि भगवद्वाक्याच्छ्रौतं स्मार्तं यथाविधि ॥ कर्म कुर्वन्ति सापेक्षा नारायणम
गोमवेदिनि ॥ ८७ ॥ आत्मनो ध्यपि कर्मादि सार्वं निष्कुमर्हन्ति ॥ स्वस्यानुष्ठा
नतामर्थाभावे निष्किञ्चनमाधवे ॥ ८८ ॥ भगवत्यात्मभारस्य विनिक्षेपं विधाय

वा॥ कृपाधर्मधानाक्षेपतेनिव्यपेक्षकैः॥६॥ मैसवानावेदोनरंतत्रमेवस्वीकु
र्तव्यमितिभावेन॥ वेदकस्तांत्रिकोमिश्रइतिमेत्रिविधोमखः॥ ॥ गन्न्यात्रापि
वैश्वानस्यानुजन्मामार्गदीक्षानुजन्मसुवैस्मवं॥ ०॥ वैसवानांकर्मयथ्रष्ठानेनका
पितृवैः॥ किंतुलोकसंग्रहार्थंकर्तव्यमेवनदम्भमनवद्यंचनं॥ कर्मणैवहिसंसिद्धिमा
स्थिताजनकादयः॥ लोकसंग्रहमेवापिसंपश्यन्कर्तुमर्हसि॥१७॥ यद्यदाचरति
श्रेष्ठस्तत्तदेवेतरोजनः॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते॥१८॥ नमेपार्थास्ति

न२

कर्त्तव्यंत्रिषुलोकेषुकिंचन॥नानवाप्तमवाप्तव्यंवर्त्तएवचकर्मणि॥२२॥ यदिह्यहंनव
र्तेयंजातुकर्मण्यतंद्रितः॥ममवर्त्मानुवर्त्ततेमनुष्याःपार्थसर्वशः॥२३॥ उत्सीदेयुरिमे
लोकानकुर्यांकर्मचेदहं॥संकरस्यचकर्त्तास्यामुपहन्यामिमाःप्रजाः॥२४॥ सक्ताःकर्म
ण्यविद्वांसोयथाकुर्वंतिभारत॥कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहमिति
॥२५॥ ह॥ एवंनरत्वस्याविशेषकर्मणांत्यागेपातित्यमपि॥नास्तिकिंतुविधिवत्तदज्ञा
निनोनिर्वेदोजातंकर्मणांत्यागः॥अज्ञस्यनज्ञोऽप्यद्वैत्यपिकालएवनिर्विवेकः॥अज्ञः

श्रीमद्भागवते ॥ तावत्कर्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा
श्रद्धा यावन्न जायते इति ॥ ७ ॥ निषिद्धं चारेनैवान प्रायश्चित्तं तनु नोचितं ॥ अ
निवेस्मव शास्त्राणां रहस्यं न हि दांभते ॥ ८ ॥ तेषां स्वातंत्र्ये हेतुमाह भागवते
देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः ॥ शर
णं शरण्यं गतो मुकुंदं परिहृत्य कर्तं ॥ ९ ॥ भगवताप्युक्तं सर्वगुह्यतमं भूयः शृ
णु मे परमं वचः ॥ इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं ॥ १० ॥ मन्मना भव मद्भ

कोमद्याजी मां नमस्कुरु॥ मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोसि मे॥२१॥ सर्वधर्मान्प
रित्यज्य मामेकं शरणं व्रज॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥२२॥ अ
च्चापि भगवद्वचनं॥ मत्कर्म कुर्वतां पुंसां कर्मलोपो भवेद्यदि तस्य तत्कर्म कुर्वन्ति त्रिं
शत्कोट्यो महर्षयः॥२३॥ अश्वत्थपिरगाममुद्दहागोमेध्य श्वनेगायं नजुवाहि मुखत्वमिति
श्रीमद्भागवते भगवद्वचनं॥ त्रिसप्तभिः पितापुत्रः पितृभिः सहतेनच॥ पक्ष्माधोस्व
गहेजातो भवान्वैकुलपावनः॥२४॥ अश्वत्थगोभुमफलं जनकानां॥ अश्वमे

मापिनां संचितप्रारब्धक्रियमाणानां कर्मणां स्वत एव परिसमाप्ति ॥ न हु क्वं भाग
वतो ॥ श्रुतं न गृह्णता: काश्चिद् गोप्योऽलब्धविनिर्गमा: ॥ कृष्णं तद्भावनायुक्ता दध्युर्मी
लितलोचना: ॥ २५ ॥ दु:सहप्रेष्ठविरहतीव्रतापधुताशुभा: ॥ ध्यानप्राप्ताच्युताश्लेष
निर्वृत्या क्षीणमंगला: ॥ २६ ॥ तमेव परमात्मानं जारबुद्ध्यापि संगता: ॥ जहुर्गु
णमयं देहं सद्य: प्रक्षीणबंधना: ॥ २७ ॥ अन्ये कादिविधानेन विनापि जमसोक ग
मनं तेषां कोऽपि न निवार्य्यते इति च भागवतो ॥ तथानंतमाधवनावका: कश्चि

ग्रस्मस्यमदेल्यपिबद्धतोहृतः त्वयामित्युक्ताविचार्य नितिनिर्मर्याविनायकानीकपमर्द्द
सप्रभो॥२॥ तेषामुपरिपमस्य प्रभुत्वमेव नास्तीति भगवान्॥ सक्रान्मनः कसपदाराविं
दपोनिर्विशितंमठुरागारागजेरिह॥ नतेयमंपाशमनश्वतन्मुटान्वप्रेकिपश्यंतीति
चीर्णोनिः क्रान्ताः॥२१॥ विस्वपुराणेचोक्तं स्वपुरुषमभिवीक्ष्यपाशहस्तं वदतियमः
किलतस्यकर्णमूले॥ परिहरमधुसूदनप्रपन्नान्प्रभुरहमस्मि नृणां न वैष्णवानां
॥२०॥ इहकोपिपापात्मा यैनकोपिभ्रमउतिभगवन्नामतो॥ न त्वाश्चिंतयंतोमां

राम

॥१३॥

येजनाःपर्युपासते ॥ तेषांनित्याभियुक्तानांयोगक्षेमंवहाम्यहं ॥२१॥ रहःगदित्वागेत्व
माघफलत्वमितिभागवतेभागवतोत्तमं ॥ नपारयेहंनिरवद्यसंयुजांस्वसाधुकृत्यं
विबुधायुषापिवः ॥ यामाभजदुर्जरगेहश्रृंखलासंवृश्च्यतद्वःप्रतियातुसाधुना ॥२२॥
तत्रैव ॥ आसामहोचरणरेणुजुषामहंस्यांवृंदावनेकिमपिगुल्मलतौषधीनां ॥ यादुः
स्त्यजंस्वजनमार्यपथंचहित्वाभेजुर्मुकुंदपदविंश्रुतिभिर्विमृग्यां ॥२३॥ स्वधर्म
त्यागेपितत्रैवस्मृ ॥ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथपतेत्ततोयदि पत्र

राम

॥१३॥

कवामद्भमन्दृमुवा किंक्रोवार्थ पाप्नोभजतां स्वधर्मतः॥ ९॥ अभ्यासमन्त्यागेपि
नैवेवं॥ नानविघोविक्रोवामद्भक्रोवानपेदाकः॥ सलिंगानाभ्यमास्त्पक्राचेर
विधिगोचरः॥ ९ प॥ ब्रह्मचारिगृहस्थश्चवानप्रस्थोपतिस्तथा॥ चत्वारोह्याश्रम
श्चैतेपंचमोमहूपाश्रयः॥ १०॥ सर्वेनोनिर्भयत्वादामेश्रीमद्भामापरोगुरुनाय
वाकं॥ सकृदेवप्रपन्नायतवास्मीतिचयाचते॥ अभयंसर्वभूतेभ्योददाम्येतद्व्रतं
मम॥ ११॥ अनन्यसाधनैर्निपिद्दश्वभगवद्धर्मइतिसिद्धं॥ ननमगावद्धर्मोविरोध

श्रौतस्मार्तकर्मादौ गृह्यानित्यकोपिदोष॥ विरोधेतु सर्वं वान्यायगमेवोच्चितमितिपूर्वो
क्तौत्योविवेक॥ = अन्यसाधनांनांवक्तापापसन्तपाक्रमात्सिद्धत्वेमुक्तिरिति॥ तदुक्तं
मेनवा प्रपन्नाधमसमानस्तुयोगीसंशुद्धकिल्बिषः॥ अनेकजन्मसंसिद्धस्ततो
यातिपरांगतिमिति॥ २१॥ भजनस्यतुनाहंनितित्युक्तं॥ ९ पापानेव्याहातिः॥ पा
ख्यापै॥ प्रपन्नोत्सनारातिरित्यमितुक्तं॥ अस्यत्रापिसकदेवहिशास्त्रापेक्षा॥ कः
नायंतारयेन्नासिनस्तक्ते॥ वाणहं बमगवद्वाक्यं॥ पराधीनादिदोषागमस्तु

क्तो मां च स्मरेत्त || अहं स्मरामि मद्भक्तं ददामि परमां गतिं || २ || तथा चन्नानि भक्ष्यो
मेध्यानि नो भक्तिरावश्यकी ति श्रीमद्भागवते || आत्मारामाश्च मुनयो निर्ग्रं
था प्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः || १० || भक्तिर्विहीनाः सुरवानंतरा
नितो पतनमेवेति भागवते || येन्ये रविंदाक्षविमुक्तमानिनस्त्वय्यस्तभावादवि
शुद्धबुद्धयः || आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोनादृतयुष्मदंघ्रयः || १ || पुनर्नि
फलत्वमप्युक्तं भागवते || श्रेयः स्रुतिं भक्तिमुदस्य ते विभो क्लिश्यंति ये केव

सर्वोधलक्षपेन वामसौ लक्ष्मल एव शिष्यनेनान्य घथा स्थूलतुषाव घाति ना ॥३॥
अन्य त्वनैः कर्मकाण्डत्युनभावव र्जितं नशोभते ज्ञानममलं निरंजनं ॥ कुतः पुनः शश्व
मदमीश्वरे न चार्पितं कर्म यदप्यकारणं ॥ ६ ॥ तथा भक्तानां न ज्ञानापेक्षा किमागव
तेम ङ्क्तियोगयुक्तानां मुनीनां वीतरागिणां ॥ न ज्ञानं न च वैराग्यं प्रायः श्रेयो
भवेदिह ॥ ७ ॥ ज्ञानादि सकलसाधनैः भक्तेरेव साध्यत्वमिति भागवते दानव्र
तनपो होमजप स्वाध्याय संयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्य

ते॥५॥ अन्यत्र जीवमात्रस्याधिकारस्तु भागवते भगवद्वचनं॥ वृषपर्वा बलिर्बाणो मयश्चाथ
विभीषणः॥ सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः॥६॥ व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्य
स्तथापरे॥ ते नाधीतश्रुतिगणा नोपासितमहत्तमाः॥७॥ अव्रतातप्ततपसो मत्संगान्मामु
पागताः॥ केवलेन हि भावेन गोप्यो गावः खगा मृगाः॥८॥ येन्ये मूढधियो नागाः सिद्धा मामी
युरंजसा॥ यन्न योगेन सांख्येन दानव्रततपोध्वरैः॥९॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्न
वानपि॥ मत्कामा रमणं जारमस्वरूपविदोबलाः॥१०॥ ब्रह्म मां परमं प्रापुः संगाच्छतसहस्रशः

राम

॥१६॥

॥१॥ तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनां ॥ प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च ॥२॥ मामेकमेव शरणमात्मानं सर्वदेहिनां ॥ याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः ॥३॥ नद्रकं नाथ तन्नाम ॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥ साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥४॥ क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति ॥ कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ॥५॥ मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः ॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यान्ति परां गतिं ॥६॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ॥७॥

राम

॥१६॥

अगस्त्यसंहितायां च ॥ आलिकोगुह्यकस्त्वं हि सोऽसः स्वयं पापात्मा ॥ कामक्रोधादिदुःखेभ्यो वै
एतोवनितादिषु ॥ १९ ॥ तत्वोन्मनानिर्गौर्घश्च मवाव्यर्मवद्धः खचित ॥ आत्मरामधर्ममोक्षार्थी
कामार्थविगतस्पृहः ॥ २० ॥ किंवा धर्मार्थमोक्षार्थी निःकामश्चापवादिजः ॥ मनोवाक्कर्मपथमे
ल नित्यं शुश्रूषकोगुरोः ॥ १२० ॥ स्ववर्णाश्रमधर्मो नः कर्मनिष्ठः सदक्षचित्तः शुचिव्रतनमाः ॥ स्व
धर्मिका द्विजवेका ॥ २१ ॥ स्त्रियः पतिव्रताश्चान्ये प्रतिलोमानुलोमजाः ॥ लोकाश्चाण्डा
लपर्यन्ता सर्वेप्यत्राधिकारिणः ॥ २२ ॥ मांडव्य उवाच ॥ सगोत्रब्रह्मस्तपोचोरो भगवन्नो ३

राम ॥९॥

विः॥ नाष्टपापवर्जितः पापोल्लखोनैः कानिकः स्मृतः ॥२३॥ अव्रती वृषलीभर्ता कुनखी सो
मविक्रयी ॥ सोपि मुक्तिमवाप्नोति विष्णोर्नाम्नानुकीर्तनात् ॥२४॥ पितृद्वेषादपि गोविंदद
म घोषात्मजः स्मरन् ॥ शिशुपालोगतः स्वर्गं किंपुनस्तत्परायणः इति ॥२५॥ तपो वक्ष्यतीक
लिं संतरणोपनिषदि ॥ द्वापरांते नारदो ब्रह्माणं प्रति जगाम ॥ कथं नु भगवन् गां पर्यटन्क
नेप लिं संतरेयमिति ॥२६॥ स होवाच साधुपृष्टोस्मि सर्वश्रुतिरहस्यं गोप्यं तच्छृणु ॥ येन कलिं संतरि
ष्यसि भगवन्नादिविष्णोर्नारायणस्य नामान्वेति ॥२७॥ नारदः पुनः पप्रच्छ भगवन् किं तन्नाम

राम ॥१०॥

मेति ॥ २ ॥ स होवाच ॥ हरे राम हरे राम राम राम हरे हरे ॥ हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥
इति षोडशकं नाम कलिकल्मषनाशनं ॥ नातः ॥ परतरोपाय ॥ सर्ववेदेषु दृश्यते ३ ॥ ३ ॥
षोडशकलावृतस्य जीवस्यावरणविनाशनं ॥ ततः ॥ प्रकाशते परं ब्रह्म मेघापाये रविरश्मिमंडल
मिवेति ॥ ३ ॥ पुनर्नारदः ॥ पप्रच्छ भगवन्कोस्य विधिरिति स होवाच नास्य विधिरिति सर्वदा शु
चिर्वा पठन्ब्राह्मणः ॥ सलोकतां समीपतां सायुज्यतामेति ॥ ३ ॥ यदा षोडशकस्य सार्द्धत्रप
कोटिर्जपति तदा ब्रह्महत्यां ॥ पातकात्तरति वीरहत्यापापा ॥ स्वर्णस्तेयाद्वृषलीगमनात्पित्रादे

वानांमनुष्याणांयेकर्मणांत्वकर्मपरित्यागोपापान्॥स्वघ:॥अचिन्ताभ्युदयः स्वघोमनुष्यमेष
घोमनुष्यतउन्यथवरणोपनिषदि॥१८ ४॥अनुत्वंनरोपिपश्चात् अलःशिवइतिवांचंवेदत्तेनसं
संवसेनेनसहमंभुंजीतेति॥१९ ५॥नदस्माःफलदाहत्वमनोमिलशिःरिवतिर्वभा॥नि:प्रतन्त्रं
विनिर्दिष्टभिर्हवाममुष्मिाकेतिच॥२० ६॥प्रेमकलपरिपाकेनसात्तात्कारोहोर्थदा॥नदे
जन्मसाफल्यंजीवन्मुक्तिस्तुसास्मता॥२१ ७॥देहत्वपपरित्यागेदेहसत्यपिपश्यवे॥भ
वेन्यधिकारप्राप्ति॥सैवप्रोक्तापरागति॥२२ ८॥चनुरोधेनननत्फलदत्वमुक्तंचहारि

स्मृतो ॥ इममेयं मंत्रं ब्रह्मरुद्रादिदेवताः ॥ ऋषयः पंचमहात्मानो मुक्ताजह्वासवांशुधो

उर्व ॥ ९नमंत्रमगात्स्योवैजह्वाहूत्वमाश्रुयात ॥ ब्रह्मत्वंकाश्यपोजह्वाकौशिकस्तु मो

गातां ॥ ८१ ॥ कार्त्तिकेयो मनुश्चैव बृहद्दार्कगिरिनारदाः ॥ नान्ताहिवित्स्यादिमुनयो देवतांतं

प्रपेदिरे ॥ ८१ ॥ इममेवजपन्मंत्रं हरुद्रत्विप्रात्हकः ॥ ब्रह्महत्यादिविनिर्मुक्तः पूज्यमानो भव

न्मौ ॥ ८२ ॥ ऋषयापिहद्रकाश्यपांतु सर्वेषां त्वक्तजीविनां ॥ शिरान्येनन्महामंत्रं नाकं ब्रह्मना

मकं ॥ ८३ ॥ तस्यश्रवणमात्रेण सर्वेश्वरदिवंगताः ॥ ८४ ॥ ॐ ह्रं वदर्शनंचो क्षं श्रीमद्भगवते

श्यावनि सापं निगृशांन्येमी नाश ॥ स्मानिनं दर्मितैवेहितं जना ॥ नए न पश्यं न्यचोगानावक
मन प्रवाहो परमं पदं बुजं ॥ ४८ ॥ स्वपि चगीनाक्ष ॥ नाहं वेदैर्न तपसा न दानेन न चेज्यया ॥ श
क्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥ ५० ॥ भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञा
तुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ ५१ ॥ तदेवस्यच्छमभिहितं स्वयर्न्नागाहस्यपक्षीशामोत्तानाव
नी योपनिषदिः श्ने ॥ सप्तचत्वारिंशश्लोकं नैर्मि स्यदेवं स्तोनिनस्यमस्तुनो देवः ॥ श्रीतेभवनिस्वा ॥
त्मानं दर्शयानिनस्मा घश्नेमंत्रैर्मिन्यं देवं स्ता जिसदेवं भश्यानिसाम्हनत्वांगच्छनिसामरनत्वं

न्यं ३

नी

यान्वद्धत्रीनि ॥ ६ ॥ परिकरप्राप्तोत्तुमागवन्नेमगवद्वाकं ॥ नैकात्मनांमेस्पृहयंति केचिन्मत्या
दसेवामिरतामदीतः ॥ पश्याम्पतोमर्नेमा ॥ प्रपञ्चसमाजयंतेमम यो हृधारिता ॥ ७ ॥ पश्यंति
नेमेहचित्रवेसंपूर्णमत्तवक्त्रा लोचनानिह पाणि दिव्यानि वा प्रमाणानि साकं ननाचं
स्पृहयंति ॥ ८ ॥ श्रुतोवाच ॥ भक्तिरेवैनं नयति भक्तिरेवैनं पश्यति भक्तिरेवैनं दर्शयति ॥ ९ ॥
स्वगात्रसंहितायां त्वतो वा बृहस्पतेर्वा पिपेल भंतेषु उत्तां जीवंतो मंत्रसिद्धाः ॥ सुमहे ताभं
प्राप्नुवंतिते ॥ १० ॥ सिद्धसाधेः पत्वान्साधपीकपितावुधेः ॥ अकृत्रिमामवेत्सिद्धाकृ

राम
॥२०॥

त्रिमार्गाधनामिधा॥५२॥ समाव्रतायोगमवाहिकृत्रिमार्गतस्या॥ सकाशात्तुनरप्यकृत्रिमा
दष्टाविभागेनविभागमस्यावदंतिवैभागवतप्रधानाः॥५३॥ साद्वैधोतिभागवते॥ समं ततः सा
र्पेनश्वभियोधोघहांहरिं भक्त्यासंजातयामक्त्या विमनसुस्खलकांतनुं॥५४॥ तत्रैवनतो
पापसहा॥ णामयं भगवतोदितः॥ यदीश्वरो भगवति यथा यैरंजसा रति॥५५॥ अनन्तेन गु
रुणुम्रू पपामक्त्या सर्वलब्धापैनेन च॥ संगेनसाधुभक्तानां मीश्वराराधनेन च॥५६॥ व
यातत्कपापांचकीर्तनेनगुणकर्मणां॥ तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः॥५७॥

राम
॥२०॥

पा. ५

हरिः सर्वेषु भूतेषु भगवानास्त ईश्वरः ॥ इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ५६ ॥ एवं नि
र्जितषड्वर्गैः क्रियते भक्तिरीश्वरे ॥ वासुदेवे भगवति यया संलभते रतिः ॥ ५७ ॥ सा भक्ति
साधनं भावः प्रेमा चेति त्रिधोदिता ॥ कृत्रिमा भवेत्तु सा पूर्वोक्ते कृत्रिमा मिथे ॥ ५८ ॥ नवधा
साधनं प्रेमभक्तिस्तु नवधा हि सा न दृश्याः ॥ साधनोपायाश्श्रवणस्मरणमुदाहृता ॥ ५९ ॥ नवस्के
विस्तुमेत्ले ॥ ब्राह्मे मुहूर्ते उत्थानं महाविष्णोर्वोधनं ॥ नीराजनं च पाद्येन स्नानं स्नानं विधान
न ॥ ६० ॥ विष्णुदाहनयुग्मे वस्त्रधारणं देवतार्चनं ॥ गोपीचंदनमृत्स्नायाः सर्वदा चोपलेपनं ॥ ६१ ॥

चौ २

एम
॥२१॥

शालग्रामशिलापूजा प्रतिमासु च भक्तितः॥ निर्माल्यतुलसीमस्तकलस्यवच
पेविधिः॥ विधिनानांत्रिकीसंध्याशिखाबंधोह्निकर्मणि॥ विष्णुपादोदकेनैव
पितृणांतर्पणंक्रिया॥६७॥ महाराजोपचारैश्च भक्त्या सत्पूजनं हरेः॥ विष्णुभक्त्या विरो
धेन नित्यनैमित्तिकाः क्रिया॥६८॥ न्नशुध्यादिकानांन्यासः सर्वे यथाविधि नवीन
फलपुष्पादेर्भक्तितः संनिवेदनं॥६९॥ तुलसीपूजनं नित्यं श्रीभागवतपूजनं॥ त्रिकाल
विष्णुपूजा॥७०॥ विष्णोर्निवेदितानां वै वस्त्रादीनां च धारणं॥ सर्वेषां पुण्यकार्याणां

चतुरात्मश्रुतिमन्त्र ९

३५

एम
॥२१॥

स्वामिद्धसौवर्तनं ॥६७॥ गुर्वाज्ञाग्रहणं तत्र विश्वासो गुरुणोदिते ॥ यथार्थमङ्गचारणं
गीतनृत्यादिभक्तितः ॥६८॥ शंखवादिध्वनिभागत्यं लीलाद्यभिनयो हरेः ॥ निर्माल्यमवि
धानं च बलिदानं यथाविधिः ॥६९॥ साधूनां स्वागतं पूजा शेषनैवेद्यभोजनं ॥ तांबूलशेष
ग्रहणं वैसंवेः सत्संगमः ॥७०॥ विशेषधर्मजिज्ञासा दशम्यादि दिनत्रये ॥ व्रतनियमि
नः स्वास्थ्यं संतोषो येन केन चै ॥७१॥ पर्वयात्रादिकार्याणां वासराघकसद्विधिः ॥ विसर्गः स
र्वं जु चपर्वाचमहाराजोपचारतः ॥७२॥ सर्वेषां वैष्णवानां च व्रतानां परिपालनं ॥ गुणावि

राम ॥ २२ ॥ ॥ ध ७ ॥

श्वरमवदृष्वनुलसीसिंगनःसद ॥ ७३ ॥ सप्तनाधुपचाश्वरामस्कंदादिचिंतनं ॥ सेध्यापांस्पप
नंनैवनश्रौचंस्मृतिकांविना ॥ ७४ ॥ निष्ठनावमनंनैवजपग्रामगुर्वीसमाश्रनं ॥ गुर्वंगनेपादवि
स्ताःहापात्तुल्लंघनंगुरो ॥ ७५ ॥ श्रक्षौहानाक्षिपाहानिर्दवनाचनलेपनं ॥ देवानानांगु
स्रगांच प्रत्युत्थानाभावनं ॥ ७६ ॥ गुरोःपुरस्तात्पादप्रसारणंनिक्षिपानय ॥ स्वमंत्रानिल
कावामोनीलवस्त्रविधारणा ॥ ७७ ॥ स्वमनैःसहमेकामादेत्र्यसच्छास्त्रपरिग्रहः ॥ सु
लस्वर्गस्यवामाक्रिमघमांसनिषेवनं ॥ ७८ ॥ मादकौषधसेवावमस्तापघनमोजनंभ्र

८ राम ॥ २८ ॥

कनुंबीकाल्लिंगादि तथा मक्कोल्लसंगतः ॥ १९ ॥ स्वैस्नववृतांमस्तथाज्ञाप्यमवेस्नवं ॥
स्तुभिनौदिकराणां मकागोरोगायचारकं ॥ २० ॥ शोकादिपाखंडरूपं च दिग्धिघेकादशी
व्रतं ॥ सुक्ताकस्याधिभेदरुचास्वच्छापारोव्रते तथा ॥ २१ ॥ पाक्कोफलादिमुक्ति स्वश्राद्ध
वैकादशीदिने ॥ द्वादश्यां च दिवास्वापं तुलस्यववचयस्तथा ॥ २२ ॥ तत्र विस्रोदिवाह्लानं श्रा
द्धं स्वेष्ठमिविदिने ॥ वेदावनुलसीम्नात्वं तथाम्बादुमवैस्नवं ॥ २३ ॥ वालामन्नपाननेमुख्य
पांचमनक्किया ॥ काष्ठास्नेपविष्ठेनवादेवस्यपूजनं ॥ २४ ॥ पूजाकालेसदालापः क

सु

राम
॥ २३ ॥

खीगरिपुजनं ॥ स्नापसंघृपणान्नादिनिष्येकपुड्रूमादतः ॥ २५ ॥ पूजावासंस्थानतो हेयेल
पावं चलं चित्ततः ॥ एकहस्तप्रणाममादिश्च काले स्वामिदर्शनं ॥ २६ ॥ पश्चुपितादिदुष्ट
नामस्कादीनां निवेदनं ॥ मंत्रध्यां विनामंत्रजपस्तथामंत्रप्रकाशनं ॥ २७ ॥ सदशक्तौ मु
ख्यत्नोपोगौणकालपरिग्रहः ॥ प्रसादग्रहणं विस्मो वर्ज्यं ये हि सम्वः सदेति ॥ २८ ॥ विशेषतो
जनेवैज्यो श्रपराधास्तु सेवने ॥ तथानामापराधाश्च वर्जनीयाः प्रयत्नतः ॥ २९ ॥ तत्र सेवापरा
धाश्चागमेषुनैवोपादकेवाधिप्रपाणां भगवद्रूहे ॥ स्वोत्सवाद्य सेवाच स्वप्रणाममलक्ष्म

राम
॥ २३ ॥

ण ॥ २ ॥ उक्किठेवाण्यसो चेवा भगवहुं दनादिकं १ कहत्तप्पगाणमस्व नत्तुरत्ताब्र

दहितं ॥ २ ॥ पादप्रसारणं वाउसनधापर्यंकवंधनं ॥ उपवनं भ्रेष्मणा श्वापिमिथ्या

भाषणमेव च ॥ २३ ॥ भाषामिश्रो जल्पो रोदनानि च विग्रहः ॥ २४ ॥ महानुग्रहो चेव च पु

चक्रा भाषणं ॥ २५ ॥ कंबलावरणं चेव परनिंदा परास्तुति ॥ स्वर्णस्त्रील भाषणं चेव स्वघो

वापुविमोचनं ॥ २७ ॥ स्मोगो गोपचारस्वत्स्वनिवेदिनमौनं ॥ ननन्कालो द्रवानं

चफदीनांमनर्थाणं ॥ २९ ॥ पविवित्रपुस्त्कावंध स्यप्रदानं बंजनादिकं ॥ पृथिवी स्नानं चै

रत्नो १ सि १ ह २

वपेषां समभिवादनं ॥ २६ पुत्रो मे नंदिनीवत्सो देवतानां दिदं नृपा ॥ अपराधात्तयाविस्मो
र्त्तोविश्वस्त्यरिकीर्तिता: ॥ २७ वोहापि ह्यावेशाद पराधापेक्षीतं नैवसुधेमया
वैस्मेवंतनदाननुवर्जनोपाग्रपत्नीन: ॥ २८ पैवेनवर्ज्जपञ्चपेतानापराधान्सधोरिताना ॥ स
वैधर्मपरिभ्रष्टा: पञ्चयतेनाकेचित् ॥ २९ राजानमहानां वैकमापद्यपिमपापं ॥ ध्यां
तांगाहेह ॥ स्पर्शपांसकृतनाशनं ॥ ३० नपेवविधिमुल्लंघ्यसह्यसामर्पणांहरे: ॥ इ
ति दुष्टं विनावाधं क्रोडमांसनिवेदनं ॥ ३१ पादलाभ्यां नयाविस्मोर्मरीपापमर्प

तां ॥ कुंकुमोदिग्धमालिनं मौनमंगोत्थुना चरेत् ॥ ४ ॥ तया पूजनकाले पि विद्रु
मगोघसर्पणं ॥ श्राद्धादिकमकुर्वाणा चनवान्नस्य च भक्षणं ॥ ५ ॥ अत्र त्वा
गंधमाल्यादिधूपनं [illegible] मद्यपानं तिनः ॥ एकमेव प्रसूनेन पूजनं
चेत्तथा ॥ ६ ॥ अकृत्वान्तकार्यं च कृत्वा निधवनं तथा ॥ स्पृष्ट्वा रजस्व
लां दर्पणं तथास्मृतकमेव च ॥ ७ ॥ रक्तं नीलमधौतं च पारक्यं मलिनं पटं ॥ परिधाय
मतं देवपूजां विमुंच्यापानमाहतं ॥ ८ ॥ क्रोधं कृत्वा स्मशानं च गत्वा मुक्त्वा पजी

स्पर्शहरेः २

राम
॥ २५ ॥

र्गमक्षु ॥ मद्यपित्वाकोद्रमांसं पिण्याकं जालपादकं ॥ ७ ॥ नयाकुसुंभशाकंच
तैलाभ्यंगं विधाय च गृहे ॥ कर्मकारांगपानकादावरं ॥ ८ ॥ विसुधर्मी तरो च रक्षा
पद्यपि चकाद्या पांदेशेशमपथं नाः ॥ न करोति हि पौत्रसंसक्तस्य नुष्यति केश
वः ॥ ९ ॥ नधात्पतिनिर्माल्यमन्यदेवस्य नैजुपः ॥ भुंक्ते न चान्नं नैवेद्यं नस्यानुष्य
ति केशवः ॥ ९ ॥ नधात्पतिनिर्माल्यमन्यदेवस्य नैजुपः ॥ भुंक्ते न चान्नं नैवेद्यं
नस्य नुष्यति केशवः ॥ १० ॥ नामापराधलुपापि सेवापराधकृदपि मुच्य

राम
॥ २५ ॥

नेहि सिंहं श्वपः होतव्य पराधान्यः कुर्व्वाहि पर्पांश्च न ॥ ११ ॥ नामाश्रयः कदाचित्स्या
न्नत्येव सनामतः नाम्नोपि सर्व्वसुहृदोह्य पराधात्पतत्यधः ॥ १२ ॥ सतां निंदा प्रक
परं निंदं नश्रवणं सतां ॥ विष्णोः शिवस्य भिन्नत्वं गुणनाम्नोश्च दर्शनं ॥ १३ ॥ अव
वज्ञा गुरुः वर्गस्य वेदशास्त्रादि निंदनं ॥ अर्थवादं हरेर्नाम्नि कुव्याख्यानादिकल्पनं
१४ ॥ पापे प्रवृत्तिर्बुद्धिस्तु हरेर्नामबलेन वै ॥ अन्यधर्मव्रतत्यागपर्मैश्चौर्नाक्रियादि
भि ॥ १५ ॥ हेः प्रमादसाम्ये च प्रमादाज्जनहांतया ॥ अश्रद्धधाने विमुखे श्रत्स्वतिज

नेनयथा॥ ६॥ परेशोपि नर्मन्नामसपदाधामपावनः॥ श्रुत्वाभिनामसमाहात्म्यं यः
प्रीत्याहितोधम॥ स्त्रेहं ममेति पात्मे सोप्येव श्चपराधकृत॥ १॥ उक्त्वादिविहि
नैर्वर्ज्यैर्विधानैः साधकोत्तम॥ जोनानुरागोमत्कांनां संगादुक्तिमवाप्नुयात्:
॥ स वधासामवेदुक्तिस्तत्रदिता विधानत॥ वधीरागानुगाचेति प्रत्येकं सा द्वि
धामता॥ १॥ शास्त्रोक्त विधिना वैधी गुरुशिक्षाक्रमोद्भवा॥ स्व तंदाचारां प्रेम
भवेद्रागानुगा हिसा॥ २॥ सा पाविभागमुक्ते व॥ श्रीमद्भागवत॥ श्रवणं कीर्तनं विष्णो

श्री १

स्मरणं पादसेवनं ॥ र्चनं वंदनं दास्यं सख्यमात्मनिवेदनं ॥ २० ॥ अनिपुण्यापि नाविसोर्भ
क्तिभ्यैन्नवलं हरणा ॥ क्रियते भगवत्सद्भावन्नन्यधीनमुत्तमं ॥ २१ ॥ नवम्यंबराणधयाने
यातिदु ॥ सहाहद्वामित्रस्कोदमपिवाधते ॥ पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं ॥ २२ ॥
तस्मादुमक्त्कयापुण्यांगोविंदचरितान्वितां ॥ मत्तपुण्यप्रदं यस्मात्कुर्यात्स्वनसं तत्र
म ॥ २३ ॥ कीर्तनं परयागायं नित्य विशदक मंगलं पुदेव्यो ॥ ज्ञानां स्वशत्रुवधमात्मविमोहनाच
गोप्यस्वकं जापतेजेनकात्मजापा ॥ पितात्वल धसाााम्नपावपंच ॥ २४ ॥ प्रजापतः

प२

स्ववीप्यां स्नाति तीर्थे पाः स्त्रियम्भवाः ॥ स्वाहूतड्वमेश्रीधुंदर्शनेजातचेतसि ॥ ५ ॥ भ्रमरा पी
पाकेकीर्त्तिनं वयथागृ । विस्नुभद्रागिरि स्थानपरागजन्मा निकर्मा शिवपादि लोके ॥ श्री
नानि नामाभीनस्थैकानि गायविज्ञज्ञोविवेदसंगः ॥ २६ ॥ स्मरणं यथा ॥ स्नातो पूर्व
स्मरणो र्यो भवत्यो लोकपूजिता ॥ वासुदेवे भगवति पापा सांमिन्नर्पितं मनः ॥ २७ ॥
श्रावि तिः स्मृः कस्मपताविद्या ॥ हेगागतस्मद्गागः च संभ्रमोनि च ॥ सत्वसंशुद्धिं पाप्ता
वर्मागींज्ञानेवावि ज्ञाभाविगागुनः ॥ २८ ॥ तन्निनपंकवपथा ॥ नस्मा । द्धानहयोन्मा

भगवान्हरिरीश्वरः ॥ श्रोतव्यः कीर्त्तितव्यश्च स्मर्त्तव्यश्चेच्छताभयं ॥ १ ॥ पादसेवनं यथा तस्मा

द्रजोरागविषादमन्युमानस्पृहाभयदैन्याधिमूलं ॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपा

दं भजताकुतोभयं ॥ २ ३ ॥ तदस्तु मे नाथ स भूरिभागो भवेत्र वान्यत्र तु वा तिरश्चां येनाह

मेकोपि भवज्जनानां भूत्वा निषेवे तव पादपल्लवं ॥ ३ ॥ अर्च्चनं यथा वैदिकस्तांत्रिको

मिश्र इति मे त्रिविधो मखः ॥ त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ॥ ४ ॥ एवं क्रिया

यो पथैः पुमान्वैदिकतांत्रिकैः ॥ अर्चन्नुभयतः सिद्धिं मत्तो विंदत्यभीप्सितां ॥ ५ ॥ वंदनं

१

ग१

यथा ॥ मममाघामंगलेनघ्नं फलवांश्चैव मे भव: ॥ पन्नमस्ये भावतो योगिध्येयांघ्रिपंक
जं ॥ ३४ ॥ तन्नेनु कापांसुसमीहेत्य भागोभुजानस्वात्मकृतं विपाकं ॥ हृद्वाग्वपुर्भिर्विदधन्न
मस्ते जीवेत यो भुक्तिपदे स दायभाक् ॥ ३५ ॥ एता: साधवे परिगणिता: नामसंस्मरषिर्या ॥
स वै मन: कृष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने ॥ कौ हर्मंदिरमार्जनादिषु श्रु
तिं चकाराच्युतसत्कथोदये ॥ ३६ ॥ मुकुंदलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शें संगम:
घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ ३७ ॥ पादौ हरे: क्षेत्रपदानुसर्पणे

गिरो हृषिकेश पदाभिवंदने॥ कामं च दास्येननुकाम काम्ययापथोत्तमश्लोकजनाश्रयारतिः
॥ ८२॥ सेयं यथा अहं हरे तव पादैकमूलदासानुदासो भविताऽस्मि भूयः॥ मनः स्मरेतासुपतेर्गु
णास्ते गृणातु वाक्कर्म करोतु काय॥ ८३॥ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं॥
मुरारेः कुतः पुनस्तच्चरणारविंदपरागसेवारतिरात्मलब्धा॥ ८४॥ सख्यं यथा अहो भा
ग्य महोभाग्यं नंदगोपव्रजौकसां॥ यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनं॥ ८५॥ उत्यं मतां॥
वसमावानुमन्यादास्यं गतानां बाहाकेतासाकं विजन॥ कृतपुराणपुंजा॥ ८६॥ ऽत्र साधन

राम
॥२९॥

मत्कोदासस्सख्यपोर्भावैकमात्रंपूर्णोत्तानेप्रेमत्तत्त्वमापामिनिदिके॥ आत्मनिवेदनंयथा
मत्प्रोपदान्मत्सम्मत्कर्म निवेदितात्माविचिकीर्षितोमे॥ नरामस्त्वंप्रतिपद्यमानोमय
मभ्युपायचकल्पतेवै॥८३॥ धर्मार्थकामास्तुनिपोभिरिहात्रिवर्गाइत्तात्रपोन्यपदमोविधा॥
येवानां॥ मत्येनदेवत्वविन्तंनिगमस्वसत्यंवाआर्पयेश्चिहृदं॥ परमस्यपुंसः॥८४॥ आन्नाश्रापि
मानुकूल्यस्यसंकल्पः॥ प्रतिकूलस्यवर्जनं॥ रक्षिष्यतीतिविश्वासोगोप्तृत्ववरणंतथा॥
आत्मानिक्षेपकार्पण्यंषड्विधाशरणागतिरिति॥८५॥ साधनाज्ञापतेभावोभावास्त

राम
॥२९॥

जायतेति ॥ तस्मात्सर्वप्रयत्नेन भावभक्तिं समभ्यसेत् ॥५८॥ सैव भावभक्तिर्हि लोके पावनेतिव्य
वहीयते ॥ प्रातरादिक्रमेणैव कानु चर्याक्रमेण वा ॥ आजन्मचरितं विश्वो नित्यं नैमित्तिकं
स्मरेत् ॥ हासितं भाषितं तस्य गतिं पावच्छ्रु चेष्टितं ॥ तत्सर्वं चिंतयेद्धिमान् एकांते तन्मनाः पा
॥५९॥ तस्याः सौकर्यसिद्ध्यर्थं श्रीमद्भागवतस्य सर्गैश्चैकं व्याचष्टे ॥ तथा पा ॥ श्राम्भिषिक्ते
तु कांकुतस्थे धर्मेणाविदितात्मनि ॥ अयनीतपातिशापूर्णा पौराणां हर्षवर्द्धिनी ॥ ६० ॥
तस्यां राजन्यां बुद्धायां प्रातर्नृपतिबोधकाः ॥ वंदिनः समुपातिष्ठन् सौम्या नृपतिवेश्मनि

स्त्वः प्रजापति सम्मोहसि ५२ क्षमालपृथिवीतुल्या तेजसा भास्कर ॥ भ्रमः शिरास्ते वायुना तुल्या गांभीर्यं समुद्धेरिव ५३

च पूर्वकं पापया २

राम ॥३०॥

१५८ ततस्ताः कठिनः सर्वे किन्नारा उव स्मितोदिताः गुष्पवृन्दे पतितं वीरं पावकं सम्प्रहर्षिता ॥ २५० वीर सौम्य प्रवृद्धस्य स्वकौशल्या प्रीतिवर्द्धन ॥ जगाद सर्वं स्वपिति त्वपि सम्प्रनराधिप ॥ २५१ विक्रमस्ते यथा विस्मे रूपं चैव मविनोसि वं श्रावृः स्यन्तस्तुष्यागुरवं दृष्टोमस्य नमोहर्ष ॥ नैहशा पार्थिवाः पूर्वं भवितारो नराधिप ॥ २५७ ॥ पथात्म मसि दुर्दुर्षी धर्मवित्सः प्रजाहित ॥ नत्वां जहाति कीर्तिश्च बलाहिश्च पुरुष र्षभ ॥ २५५ ॥ श्रीश्च धर्मश्च काकुत्स्थ त्वपि नित्यं प्रतिष्ठितौ ॥ एताश्चान्याश्च मधुरा वंदिभिः परिकीर्तिताः ॥ २५४ ॥ सूतास्त्वसंस्तवैर्दिव्यैर्बोधयं स्मराघवं ॥ स्तुतिभिः स्तूयमानाभिः प्रत्यबुध्यत राघवः ॥ २५९ ॥

त्ति ९

स्त

राम ॥३०॥

सततहीतापसपनंपांडुराज्ञस्तुतात्कुरां उक्तस्थौनामस्रपनाद्ध रिनीरापत्पागोयथापर नमुन्यिवंस
हात्म्यानंप्रस्ताः प्रांजलयोनराः शालिलंमाजनैः ॥ शुभ्रैरूपनस्युः सहस्वसा ॥ ॥ कृत्वोदकंश्राद्धविर्म्
त्वाकालेहुतहुताशनाः ॥ देवागारंजगामाथपुरायमिक्ष्वाकुसेवितं ॥ ६० ॥ तत्रदेवान्पितॄंश्चैवप्रा
नचैपित्वायथाविधि ॥ यात्रकदांतरामोनिजंगामजनैर्वृत ॥ ६१ ॥ उपनस्युर्महात्मानोमंत्रिणः
सपुरोहिता ॥ वसिष्ठप्रमुखाः सर्वेदीप्यमानाद्भवास्नप ॥ ६२ ॥ वानिपाश्चमहात्मानोनानानत्रपदे
श्वरा ॥ रामस्योपाविशन्पार्श्वेभ्रातृस्यैवपयामरा ॥ ६३ ॥ मातोल साराणश्चान्मभनुघ्नश्चमहा ॥

यथाः उपासांचक्रिरे हृष्टा वेदास्त्रिपथगाध्वं ॥ ६४ ॥ यानाः प्रांजलयो भूत्वा किंकरा मुदितानना ॥
मुदितानामपार्श्वस्था बहवः समुपासते ॥ ६५ ॥ वानराश्च महावीर्या विंशतिः कामरूपिणः
सुग्रीवप्रमुखा राममुपासन्ते महौजसः ॥ ६६ ॥ विभीषणाश्चरात्मा मंत्रिभिः चतुर्भिः परीवारितः उपास्ते
महात्मानं धनेशमिव गुह्यकाः ॥ ६७ ॥ यथा निगमवृद्धाश्च कुलीना पेचमानवाः शिरसावंद्य राजा
नमुपासंते विचक्षणाः ॥ ६८ ॥ तथा पार्थिवा राजा भिर्मभिः र्ऋषिभिर्वीरैः ॥ राजभिस्च महाविर्यै
वीनरैश्च समन्वितैः ॥ ६९ ॥ यथा देवेश्वरो नित्यमृषिभिः समुपास्यते ॥ अधिकस्तेन रूपेण रामः शालो

[illegible] द्विरो वने ॥ २७ ॥ तेषां समुपविष्टानां जाताः सुमधुराः कथाः ॥ कथ्यं मे

धर्मसंसक्ताः पुराणाजन्म महात्मभिः ॥ ७१ ॥ २५ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये उत्तरकांडे मन्व

न्तरेशः सर्गः ॥ ३७ ॥ एवं विधानैर्मे भगवन्मनं नेत्रवक्त्र त्रिमस्यान्मनसोनुरागः ॥ सर्वसाध्यः सकलै

प्रपन्नभक्तिः परा सा पाक्षाधनं नन्न ॥ ७२ ॥ भक्तिः पा सर्वसुपन्नसाध्या हेविपापाया खलु प्रेमल

क्षणा ॥ तस्याः स्वरूपं प्रवदामि सांगं ससाधनं सौख्यमादेवं च ॥ ७३ ॥ प्रेमा परा प्रीतिरतीतिलो

केनापान्यभेकानिबद्धं निसंतं ॥ पंचांगयुक्तं हारसह्रपिस्ती सामा वामिधासेवनं दंगहीना ॥ ७४ ॥

॥ श्रीसिवनामामृतं ॥

नस्त्वं शृंगारमुख्या हि मुख्या वीरादयो गौणास्सामिधांस्युः ॥ अन्तोस्तु से व्याप्य माहिपंचवपृथग्ज
नैः ॥ सप्रतिषेवणीयाः ॥ ७५ ॥ शृंगाररसव्यवात्सल्लदास्यशांतामिधारसाः ॥ पूर्णानित्यं हि लोके
षु नृणां सत्ताजनैयुक्ताः ॥ ७६ ॥ अनेनवीरकरुणहास्यरौद्रभयानकाः ॥ वीभत्सश्चाद्भुतश्चैव पृ
थग्जानप्रदास्मृताः ॥ ७७ ॥ सुनीतावद्भुगवत्तत्रूपाःसहरूपमेवोच्यते ८ भावेरसा ॥ सहैवापलब्धा
नंदीभगवतोनि ॥ ७८ ॥ श्रीमद्भागवतेच ॥ मल्लानामशनिर्नृणांनरवरः स्त्रीणांस्मरोमूर्तिमा
